# Shrirama Tandava Stotram

# શ્રીરામ તાણ્ડવ સ્તોત્રમ્

## Document Information

Text title : Ramatandava Stotram

File name : rAmatANDavastotram.itx

Category : raama, bhAgavatAnanda

Location : doc_raama

Author : (Copyright) Shri Bhagavatananda Guru

Latest update : December 27, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# શ્રીરામ તાણ્ડવ સ્તોત્રમ્

ઇન્દ્રાદયો ઊચુઃ -
જટાકટાહયુક્તમુણ્ડપ્રાન્તવિસ્તૃતં હરેઃ
અપાઙ્ગક્રુદ્ધદર્શનોપહાર ચૂર્ણકુન્તલઃ ।
પ્રચણ્ડવેગકારણેન પિઞ્જલઃ પ્રતિગ્રહઃ
સ ક્રુદ્ધતાણ્ડવસ્વરૂપધૃગ્વિરાજતે હરિઃ ॥ ૧॥

અથેહ વ્યૂહપાર્ષ્ણિપ્રાગ્વરૂથિની નિષઙ્ગિનઃ
તથાઞ્જનેયઋક્ષભૂપસૌરબાલિનન્દનાઃ ।
પ્રચણ્ડદાનવાનલં સમુદ્રતુલ્યનાશકાઃ
નમોઽસ્તુતે સુરારિચક્રભક્ષકાય મૃત્યવે ॥ ૨॥

કલેવરે કષાયવાસહસ્તકાર્મુકં હરેઃ
ઉપાસનોપસઙ્ગમાર્થધૃગ્વિશાખમણ્ડલમ્ ।
હૃદિ સ્મરન્ દશાકૃતેઃ કુચક્રચૌર્યપાતકં
વિદાર્યતે પ્રચણ્ડતાણ્ડવાકૃતિઃ સ રાઘવઃ ॥ ૩॥

પ્રકાણ્ડકાણ્ડકાણ્ડકર્મદેહછિદ્રકારણં
કુકૂટકૂટકૂટકૌણપાત્મજાભિમર્દનમ્ ।
તથાગુણઙ્ગુણઙ્ગુણઙ્ગુણઙ્ગુણેન દર્શયન્
કૃપીટકેશલઙ્ઘ્યમીશમેકરાઘવં ભજે ॥ ૪॥

સવાનરાન્વિતઃ તથાપ્લુતં શરીરમસૃજા
વિરોધિમેદસાગ્રમાંસગુલ્મકાલખણ્ડનૈઃ ।
મહાસિપાશશક્તિદણ્ડધારકૈઃ નિશાચરૈઃ
પરિપ્લુતં કૃતં શવૈશ્ચ યેન ભૂમિમણ્ડલમ્ ॥ ૫॥

વિશાલદંષ્ટ્રકુમ્ભકર્ણમેઘરાવકારકૈઃ
તથાહિરાવણાદ્યકમ્પનાતિકાયજિત્વરૈઃ ।
સુરક્ષિતાં મનોરમાં સુવર્ણલઙ્કનાગરીં

નિજાસ્ત્રસઙ્કુલૈરભેદ્યકોટમર્દનં કૃતઃ ॥ ૬॥

પ્રબુદ્ધબુદ્ધયોગિભિઃ મહર્ષિસિદ્ધચારણૈઃ
વિદેહજાપ્રિયઃ સદાનુતો સ્તુતો ચ સ્વસ્તિભિઃ ।
પુલસ્ત્યનન્દનાત્મજસ્ય મુણ્ડરુણ્ડછેદનં
સુરારિયૂથભેદનં વિલોકયામિ સામ્પ્રતમ્ ॥ ૭॥

કરાલકાલરૂપિણં મહોગ્રચાપધારિણં
કુમોહગ્રસ્તમર્કટાચ્છભલ્લત્રાણકારણમ્ ।
વિભીષણાદિભિઃ સદાભિષેણનેઽભિચિન્તકં
ભજામિ જિત્વરં તથોર્મિલાપતેઃ પ્રિયાગ્રજમ્ ॥ ૮॥

ઇતસ્તતઃ મુહુર્મુહુઃ પરિભ્રમન્તિ કૌન્તિકાઃ
અનુપ્લવપ્રવાહપ્રાસિકાશ્ચ વૈજયન્તિકાઃ ।
મૃધે પ્રભાકરસ્ય વંશકીર્તિનોઽપદાનતાં
અભિક્રમેણ રાઘવસ્ય તાણ્ડવાકૃતેઃ ગતાઃ ॥ ૯॥

નિરાકૃતિં નિરામયં તથાદિસૃષ્ટિકારણં
મહોજ્જ્વલં અજં વિભું પુરાણપૂરુષં હરિમ્ ।
નિરઙ્કુશં નિજાત્મભક્તજન્મમૃત્યુનાશકં
અધર્મમાર્ગઘાતકં કપીશવ્યૂહનાયકમ્ ॥ ૧૦॥

કરાલપાલિચક્રશૂલતીક્ષ્ણભિન્દિપાલકૈઃ
કુઠારસર્વલાસિધેનુકેલિશલ્યમુદ્ગરૈઃ ।
સુપુષ્કરેણ પુષ્કરાઞ્ચ પુષ્કરાસ્ત્રમારણૈઃ
સદાપ્લુતં નિશાચરૈઃ સુપુષ્કરઞ્ચ પુષ્કરમ્ ॥ ૧૧॥

પ્રપન્નભક્તરક્ષકં વસુન્ધરાત્મજાપ્રિયં
કપીશવૃન્દસેવિતં સમસ્તદૂષણાપહમ્ ।
સુરાસુરાભિવન્દિતં નિશાચરાન્તકં વિભું
જગત્પ્રશસ્તિકારણં ભજેહ રામમીશ્વરમ્ ॥ ૧૨॥

ઇતિ શ્રીભાગવતાનન્દગુરુણા વિરચિતે શ્રીરાઘવેન્દ્રચરિતે
ઇન્દ્રાદિ દેવગણૈઃ કૃતં શ્રીરામતાણ્ડવસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shrirama Tandava Stotram*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*